सम्बन्धोऽभिप्रेयते श्रुत्यन्तरवशेन स्रष्टव्यान्तरोपसंग्रहात्। यथा च "सर्वं खल्विदं ब्रह्म तज्जलान्" इत्यत्र साक्षादेव सर्वस्य वस्तुजातस्य ब्रह्मजत्वं श्रूयमाणं न प्रदेशान्तरविहितं तेजःप्रमुखमुत्पत्तिक्रमं वारयति एवं तेजसोऽपि ब्रह्मजत्वं श्रूयमाणं न श्रुत्यन्तरविहितं नभःप्रमुखमुत्पत्तिक्रमं वारयितुमर्हति। ननु शमविधानार्थमेतद्वाक्यं "तज्जलानिति शान्त उपासीतेति" श्रुतेः नैतत्सृष्टिवाक्यं न तस्मादेतत्प्रदेशान्तरप्रसिद्धं क्रममनुरोद्धुमर्हति। "तत्तेजोऽसृजतेत्येतत्सृष्टिवाक्यं तस्मादत्र यथाश्रुति क्रमो ग्रहीतव्य इति। नेत्युच्यते। न हि तेजःप्राथम्यानुरोधेन श्रुत्यन्तरप्रसिद्धोवियत्पदार्थः परित्यक्तव्यो भवति पदार्थधर्म्मत्वात् क्रमस्य। अपि च तत्तेजोऽसृजतेति नात्र क्रमस्य वाचकः कश्चित् शब्दोऽस्ति अर्थात्तु क्रमोगम्यते स च वायोरग्निरित्यनेन श्रुत्यन्तरप्रसिद्धेन क्रमेण निवार्य्यते। विकल्पसमुच्चयौ तु वियत्तेजसोः प्रथमजत्वविषयौ असम्भवानभ्युपगमाभ्यां निवारितौ। तस्मान्नास्ति श्रुत्योर्विप्रतिषेधः। अपि च छान्दोग्ये "येनाश्रुतं श्रुतं भवतीती"त्येतां प्रतिज्ञां वाक्योपक्रमे श्रुतां समर्थयितुमसमाम्नातामपि वियदुत्पत्तावुपसंख्यातव्यं किमङ्ग पुनस्तैत्तिरीयके समाख्यातं न संगृह्यते। यच्चोक्तमाकाशस्य सर्वेणानन्यदेशत्वात् ब्रह्मणा तत्कार्य्यैश्च सह विदितमेव तद्भवति अतो न प्रतिज्ञा हीयते। न च "एकमेवाद्वितीयमिति" श्रुतिकोपो भवति क्षीरोदकवत् ब्रह्मनभसोरव्यतिरेकोपपत्तेरिति। अत्रोच्यते न क्षीरोदकन्यायेनेदमेकविज्ञानेन सर्व्वविज्ञानं नेतव्यम्। मृदादिदृष्टान्तप्रणयनाद्धि प्रकृतिविकारन्यायेनैवेदं सर्वविज्ञानं नेतव्यमिति गम्यते। क्षीरोदकन्यायेन सर्वविज्ञानं कल्प्यमानं न सम्यग्विज्ञानं स्यात्। न हि क्षीरज्ञानगृहीतस्योदकस्य सम्यग्ज्ञानगृहीतत्वमस्ति। न च वेदस्य पुरुषाणामिव मायालोकवञ्चनादिभिरर्थावधारणमुपपद्यते। सावधारणा चेयम् "एकमेवाद्वितीयमिति" श्रुतिः क्षीरोदकन्यायेन नीयमाना पीड्येत। न च स्वकार्य्यापेक्षयैवेदं वस्त्वेकदेशविषयं सर्वविज्ञानमेकाद्वितीयतावधारणञ्चेति न्याय्यम्। मृदादिष्वपि हि तत्सम्भवान्न तदपूर्व्ववदुपन्यसितव्यम्भवति "श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्षीयेनाश्रुतं श्रुतम्भवती"त्यादिना। तस्मादशेषवस्तुविषयमेवेदं सर्वविज्ञानं सर्वस्य ब्रह्मकार्य्यत्वापेक्षयोपन्यस्यत इति द्रष्टव्यम्। यत् पुनरेतदुक्तमसम्भवाद्गौणी गगनस्योत्पत्तिश्रुतिरिति। अत्र ब्रूमः "यावद्विकारन्तु विभागो लोकवत्" सू०। तु शब्दोऽसम्भवाशङ्काव्यावृत्त्यर्थः। न खल्वाकाशोत्पत्तावसम्भवाशङ्का कर्त्तव्या यतोयावत् किञ्चित् विकारजातं दृश्यते घटघटिकोदञ्चनादि वा कटककेयूरकुण्डलादि वा सूचीनाराचनिस्त्रिंशादि वा तावानेव विभागो लोके लक्ष्यते नत्वविकृतं किञ्चित् कुतश्चिद्विभक्तमुपलभ्यते। विभागश्चाकाशस्य पृथिव्यादिभ्योऽवगम्यते तस्मात् सोऽपि विकारो भवितुमर्हति। एतेन दिक्कालमनःपरमाणूनां कार्य्यत्वं व्याख्यातम्। नन्वात्मापि आकाशादिभ्यो विभक्त इति तस्यापि कार्य्यत्वं घटादिवत् प्राप्नोति, न "आत्मन आकाशः सम्भूत इति श्रुतेः। यदि ह्यात्मापि विकारः स्यात्तस्मात् परमन्यन्न श्रुतमित्याकाशादि सर्व्वं कार्य्यं निरात्मकमात्मनः कार्य्यत्वे स्यात् तथा च शून्यवादः प्रसज्येत। आत्मत्वादेवात्मनो निराकरणशङ्कानुपपत्तिः। नह्यात्मागन्तुकः कस्यचित्, स्वयंसिद्धत्वात्। नह्यात्मात्मनः प्रमाणमपेक्ष्य सिध्यति। तस्य हि प्रत्यक्षादीनि प्रमाणान्यन्यसिद्धये उपादीयन्ते। नह्याकाशादयः पदार्थाः प्रमाणनिरपेक्षाः स्वयंसिद्धाः केनचिदभ्युपगम्यन्ते। आत्मा तु प्रमाणादिव्यवहाराश्रयत्वात् प्रागेव प्रमाणादिव्यवहारात् सिद्ध्यति। नचेदृशस्य निराकरणं सम्भवति। आगन्तुकं हि वस्तु निराक्रियते न स्वरूपम्। य एव हि निराकरणकर्त्ता तदेव तस्य स्वरूपम्। नह्यग्नेरौष्ण्यमग्निना निराक्रियते। तथाहमेवेदं जानामि वर्त्तमानं वस्तु अहमेवातीततरञ्चाज्ञासिषम् अहमेवानागततरञ्च ज्ञास्यामीत्यतीतानागतवर्त्तमानभावेनान्यथाभवत्यपि ज्ञातव्ये न ज्ञातुरन्यथाभावोऽस्ति सर्वदा वर्त्तमानस्वभावत्वात्। तथा भस्मीभवत्यपि देहे नात्मन उच्छेदोवर्त्तमानस्वभावत्वादन्यस्वभावत्वं वा न सम्भावयितुं शक्यम्। एवमप्रत्याख्येयस्वभावत्वादेवाकार्य्यत्वमात्मनः कार्यत्वञ्चाकाशस्य। यत्तूक्तं स्वसमानजातीयमनेकं कारणद्रव्यं व्योम्नोनास्तीति तत्प्रत्युच्यते। न तावत् स्वसमानजातीयमेवारभते न भिन्नजातीयमिति नियमोऽस्ति न हि तन्तूनां तत्संयोगानाञ्च समानजातीयत्वमस्ति द्रव्यत्वगुणत्वाभ्युपगमात्। न च निमित्तकारणानामपि तुरीवेमादीनां समानजातीयत्वनियमोऽस्ति। स्यादेतत् समवायिकारणविषयएव समानजातीयत्वाभ्युपगमो न कारणान्तरविषय इति तदप्यनैकान्तिकम्। सूत्रगोवालैर्ह्यनेकजातीयैरेका रज्जुः सृज्यमाना दृश्यते। तथा सूत्रैरूर्णादिभिश्च विचित्रान् कम्बलान् वितन्वते। सत्त्व-